# SAMPLE PAPER-2

**2009**

**संस्कृतम् {सम्प्रेषणाधारितम्}**

**COMMUNICATIVE SANSKRIT**

**अवधिः : होरात्रयम्** **CLASS- X** **पूर्णाङ्कः : 100**

**Time allowed: 3 hours** **Maximum Marks: 100**

| | |
|---|---|
| **खण्डः क : अपठितांश-अवबोधनम्**<br>**Section A: Unseen Reading Comprehension** | **15 Marks** |
| **खण्डः ख : रचनात्मक-कार्यम्**<br>**Section B: Writing Skills** | **20 Marks** |
| **खण्डः ग : अनुप्रयुक्त-व्याकरणम्**<br>**Section C: Applied Grammar** | **30 Marks** |
| **खण्डः घ : पठित-अवबोधनम्**<br>**Section D: Reading Comprehension** | **35 Marks** |

**Instructions:**
**निर्देशाः-**

i. **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
**The question paper has four sections.**

ii. **प्रतिखण्डम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।**
**The answers have to be written in a separate answer-sheet.**

iii. **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
**The answers to each section must be written at one place.**

iv. **प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**
**Don't answer in the question paper.**

v. **प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।**
**Write the question number according to the question paper.**

vi. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**
**Answer all the questions in "SANSKRIT".**

---

## खण्डः क (Section A)

## अपठितांश–अवबोधनम्

**Unseen Reading Comprehension** **15 Marks**

**1. अधोलिखित–अनुच्छेदद्वयं पठित्वा प्रदत्तप्रश्नान् पृथक् प्रदत्तायाम् उत्तरपुस्तिकायाम् उत्तरत :**
**Read the following two passages and answer the questions in the given answer-sheet:**

(क) <u>प्रथमः अनुच्छेदः</u>

पाण्डवानां वनवासाज्ञातवासयोः अनन्तरं यदा तेषां कृते अर्धराज्यदानविषये सन्धानाय श्रीकृष्णः दुर्योधनस्य सभां प्रति गच्छति । तत्र दुर्योधनः कृष्णस्य एकमपि वचनं नाङ्गीकरोति । कृष्णस्य अवमानं कृत्वा तस्य बन्धनाय प्रयतते । तदा क्रुद्धः कृष्णः स्वायुधं सुदर्शनचक्रम् आमन्त्र्य दुर्योधनं हन्तुम् आदिशति ।

परन्तु एवंकरणेन श्रेष्ठस्य आयुधस्य शक्तिः व्यर्था भविष्यति इति सुदर्शनस्य परामर्शं श्रुत्वा श्रीकृष्णः स्वादेशं स्थगयति ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 2 = 2**

*i.* कथंभूतः कृष्णः सुदर्शनम् आमन्त्रयति ?

*ii.* कः कृष्णस्य एकमपि वचनं नाङ्गीकरोति?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 1 = 2**

*i.* किमर्थं कृष्णः दुर्योधनस्य सभां गच्छति ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 2 = 1**

*i.* 'आयुधस्य' इति पदस्य विशेषणं लिखत ।

*ii.* 'नाङ्गीकरोति' अत्र सन्धिः संयोगः वा ?

**(ख) <u>द्वितीयः अनुच्छेदः</u>**

'सचिन् तेण्डूल्कर्' विश्व–क्रिकेट्–क्षेत्रे इदं नाम नक्षत्रमिव राजते । षोडषतमे वयसि क्रीडायाः आरम्भः कृत्वा तदनन्तरं अस्मिन् क्षेत्रे बहु साधितवान् एषः । तस्य जन्म 1973 तमे वर्षे अभवत् । तस्य पिता रमेश् तेण्डूल्कर् एकः मराठीसाहित्यिकः आसीत् । बाल्यात् एव तस्य आसक्तिः अस्यां क्रीडायाम् आसीत् । तस्य पित्रोः सहकारेण सः क्रिकेट्–क्षेत्रे विश्वप्रसिद्धः अभवत् । सततं परिश्रमः एव तस्य सिद्धेः कारणम् । सर्वाधिकानि शतकानि धावनाङ्केषु कृत्वा विश्वे सर्वप्रथमस्थाने बहुदिनेभ्यः विराजमानः विद्यते । कपिल्–देव्, रविशास्त्री, अजरुद्दीन् इत्यादिभिः सह अपि क्रीडितवान् । तथैव महेन्द्रसिंग् धोनी , युवराज् सिंग्, इत्यादिभिः नूतनैः युवकैः सहापि सः समानसामर्थ्येण खेलन् सः भारतीययुवकानां कृते आदर्शप्रायः अस्ति । यद्यपि तस्मात् अनन्तरम् आगताः अपि क्रीडायाः निवृत्ताः अभवन् तथापि अद्यापि पूर्वसामर्थ्येण सह एव क्रीडन् अस्ति । अग्रे सः इतोऽप्यधिकं साधयतु इति सर्वेषाम् इच्छा ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 4 = 2**

*i.* तेण्डुल्करस्य नाम क्रिकेट्–क्षेत्रे किमिव विराजते?

*ii.* केषां कृते सचिन् आदर्शप्रायः अस्ति ?

*iii.* रमेश् तेण्डूल्कर् कः आसीत् ?

*iv.* तेण्डूल्करस्य सिद्धेः कारणं किम् ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 2 = 4**

*i.* कैः सह तेण्डूल्कर् क्रीडितवान् ?

*ii.* कथं सः विश्वे क्रिकेट्–क्रिडायां सर्वप्रथमस्थाने विराजमानः अस्ति ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 4 = 2**

*i.* अनुच्छेदात् शानच्प्रत्ययान्तं पदमेकं चित्वा लिखत ।

*ii.* 'विश्वप्रसिद्धः' अस्य समासविच्छेदं कुरुत ।

*iii.* 'वयसि' इति पदस्य विशेषणं लिखत ।

*iv.* 'साधितवान्' अस्य पदस्य कर्तृपदं किम् ?

**IV. अस्य अनुच्छेदस्य समुचितं शिर्षकं लिखत ।**

**Write a suitable title for the above paragraph.** **1 x 2 = 2**

## खण्डः – ख
## (रचनात्मकलेखनम् )
**Section B: Writing Skills**

**2. अग्रजेन अनुजं प्रति लिखितम् अधः दत्तं पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत ।**

**Complete and rewrite the letter with the help of the words given in the box.** **½ x 10 = 5**

1. __________
जयपुरम्
10–12–2008

प्रिय 2. ____________

जन्मदिनस्य 3. _____________।

अहं तव जन्मदिनोत्सवासरे 4. ________ न शक्नोमि । पत्रद्वारा अस्मिन् अवसरे तव 5. __________ सर्वत्र सिद्धिः 6. ____________ इति आशंसे । अवकाशे 7. _________ आगमिष्यामि ।

8.__________ ।

9. __________
रामः

| |
|---|
| सविधे,<br>कृष्णः,<br>10.________________<br>गुजरात् राज्यम् |

| |
|---|
| महाराजछात्रावासः, शुभाशंसाः, अनुज!, अहमदाबाद्, गृहम्, भविष्ये, लभ्यताम्, शुभमस्तु, उपस्थातुं, तवाग्रजः |

3. पुस्तकस्य आपणे द्वयोः मित्रयोः सम्भाषणम् उचितपदैः पूरयित्वा लिखत ।

**Complete the following dialogue with the help of the statements given in the box and rewrite in your answer-sheet:** **1 x 5 = 5**

मयूरः– प्रभव! एतत् 1.____________ पश्य ।

प्रभवः– किं पुस्तकम् एतत् ।

मयूरः– दशमकक्षायाः 2.__________ अभ्यासपुस्तकम् । 3._________ एतत् ।

प्रभवः– परन्तु 4._________समीपे एकं पुस्ताकमस्ति किल ।

मयूरः – अस्ति, परम् पश्य अत्र 5._________ अभ्यासाः दत्ताः । यदि अधिकम् 6.______ कुर्मः परीक्षायै उपयोगाय भवति ।

प्रभवः– तर्हि 7. _________अध्यापकोऽपि कथयति 'संस्कृते 8.____________अभ्यासः अधिकः भवेत्' इति ।

मयूरः – 9.________न केवलं व्याकरणांशाः, पाठानामपि 10._________ सन्ति ।

| |
|---|
| संस्कृतविषयस्य, क्रेष्यावः, अस्माकं, अभ्यासं, क्रेष्यावः, व्याकरणांशानां, पुस्तकं, भिन्नाः, अस्मिन्, प्रश्नोत्तराणि, |

4. पञ्चसु संस्कृतवाक्येषु मञ्जूषा–पद–सहायतया अधोलिखितं चित्रं वर्णयत ।

**Describe the following picture in five Sanskrit sentences with the help of words given in the box:** **2x 5 =10**



| |
|---|
| गृहाणि, कुक्कुरः, महिलाः, मार्गे, सम्भाषणं कुर्वन्ति, बालः, पर्वतशृङ्खलाः, उभयतः |

## खण्डः ग (Section C)

## अनुप्रयुक्तव्याकरणम्

**Applied Grammar**

5. अधोलिखित–वाक्येषु रेखाङ्कित–पदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायां लिखत ।

**Rewrite the underlined words of the following sentences in your answer-sheet after joining or disjoining *Sandhis:*** **1 x 3 = 3**

1. प्रियच्छात्राः ! 2. अद्य + अहम् अरुणाचलप्रदेशस्य विषये वदामि । 3. आसक्तास्सर्वे श्रूयन्ताम् ।

6. अधोलिखित–अनुच्छेदे रेखाङ्कित–पदेषु समासविग्रहं कृत्वा पुनः उत्तरपुस्तिकायां लिखत ।
**Disjoin the compounds in the underlined words and rewrite the paragraph in the answer-sheet: 1 x 4 = 4**

1. **जगन्नाथः** इति विष्णोः अपरं नाम ।
2. तारापीडः विलासवतीं **कृशोदरि !** इति सम्बोधयति ।
3. **पञ्चानां रात्रीणां समाहरः** इति कस्यचित् काव्यस्य नाम ।
4. वृक्षः **फलानां च पुष्पाणां च पत्राणां च** भारं वहति ।

7. रेखाङ्कितपदानां प्रकृति–प्रत्ययान् विभज्य अनुच्छेदं पुनः लिखत ।
**Rewrite the passage after disjoining suffixes of underlined words : 1 x 5 = 5**

1. **उत्साहिनां** किमपि असाध्यं न भवति ।
2. जनानां **स्वाभाविकं** सामर्थ्यं सर्वदा न ज्ञायते ।
3. व्याघ्री स्वपुत्रान् अवधानेन पालयति ।
4. **कर्तव्यं** कर्म मुख्यं भवति ।
5. **भारवत्** फलं वृक्षात् शीघ्रं पतति ।

8. अधोलिखितां तालिकाम् उपयुज्य संस्कृते पञ्चवाक्यानि रचयत ।
**Frame five sentences using the words in following table: 1 x 5 =5**

| कदाचित्, यथा, यदि, सहसा, सर्वथा |
|---|

1. __________ व्यायामः क्रियते तर्हि देहः दृढः भवति ।
2. त्वं _______ मम गृहम् आगच्छ ।
3. __________ अविचारितं कर्म नकर्तव्यम् ।
4. नगरे ____________ कोलाहलः उत्पन्नः ।
5. गुरुः ____________ करोति शिष्यः तमेव अनुसरति ।

9. अधोलिखित–वार्तालापे रिक्तस्थानानि पूरयित्वा उत्तराणि एव उत्तरपुस्तिकायां लिखत ।
**Fill in the blanks in the following dialogue and write the answers in the answer-sheet: 1 x 3 =3**

रविः– किमर्थं सः शीघ्रं_______?
शशी – ______ न धाव्यते, सः तथा व्यायामं करोति ।
रविः – किमर्थं तेन __________ क्रियते ?
शशी– स्वास्थ्याय ।

10. अधोलिखित–परीक्षासमयसूच्याम् अङ्कानां स्थाने संस्कृतपदेषु समयम् उत्तरपुस्तिकायां लिखत ।
**Here is the examination time table. Indicate the time in Sanskrit in the answer-sheet in place of figures. 1 x 4 = 4**

9:45– परीक्षाभवनं प्रति छात्राणां गमनम् ।
10:15– लेखनारम्भः ।
1:30 – समापनम् ।
2:00 – भवनात् गृहगमनम् ।

**11.अङ्कानां स्थाने संस्कृत–सङ्ख्यावाचक–विशेषण–पदानि प्रयुज्य उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Replacing numerals with Sanskrit adjectives in the following sentences, write your answers in the answer-sheet:** **½ x 4 = 2**

___________ (1) वर्षे _____ ( 12 ) मासाः भवन्ति । मासे ________ (2) पक्षौ ______ (30) दिनानि च भवन्ति ।

**12.अधोलिखितवाक्यानां संशोधनं कृत्वा वाक्यानि पुनः उत्तरपुस्तिकायां लिखत ।**

**Correct and rewrite the following sentences in the answer-sheet:** **1 x 4 = 4**

1. छात्रैः प्रतिदिनं पाठाः **<u>पठनीयम्</u>** ।
2. बुद्धिमानेकः **<u>चतुर्णां</u>** मूर्खैः सह नदीं प्रति अगच्छत् ।
3. **<u>यूयं</u>** सर्वे अनुशासनं पालयन्तु ।
4. अग्रिमवर्षे निर्वाचनम् **<u>अभवत्</u>** ।

## खण्डः घ (Section D)

## पठित–अवबोधनम्

## Reading Comprehension

**13.अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Read the following prose, poetry and drama passages and answer the given questions in the answer-sheet:**

**<u>गद्यांशः</u>–**

दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः । तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान् । यदा सः तस्य आवरणम् अपसारयति तदा भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति । भीतः सः कलशं पुनः आवृत्य तं च आदाय मित्रस्य गृहं समागतः । स्वमित्रं सर्पेण मारयितुम् इच्छन् स भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान् । विचित्रा खलु दैवगतिः । पतितात् कलशात् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान् । कलशपातनशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोकयन्तौ स्थितौ ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x3=1 ½**

*i.* दैवगतिः कीदृशी भवति ?

*ii.* कः दुष्टबुद्धिं दष्टवान् ?

*iii.* किं खनित्वा दुष्टबुद्धिः कलशं प्राप्तवान् ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 2 = 2**

*i.* प्रबुद्धौ तौ दम्पती कीदृशम् निजगृहम् अपश्यताम् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 3 = 1 ½**

*i.* 'सः भित्तौ _______' अत्र 'सः' इति पदं कस्मै प्रयुक्तम्?

*ii.* 'शीघ्रम्' अस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

*iii.* 'भासमानम्' अत्र कः प्रत्ययः अस्ति ?

**पद्यांशः–**

कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य ।
क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 1 = 1**

*i.* विनीतस्य वशे कः भवति ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 2 = 2**

*i.* कीदृशे पथि स्थातव्यम् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **1 x 2 = 2**

*i.* पद्यांशात् 'इनि'–प्रत्ययान्तं पदं चित्वा लिखत ।

*ii.* 'न्याय्ये' इति पदं कस्य पदस्य विशेषणम् ?

**नाट्यांशः–**

पर्यटनाधिकारी–( ध्वनिविस्तारकयन्त्रस्य समीपं गत्वा ) प्रियच्छात्राः ! अभिनन्दनं भवताम् अस्मिन्प्रदेशे । प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः । एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि । प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि । अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम् ? अनुमीयताम् ।

हिमांशुः– अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः । अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति । अतः अरुणस्य प्रदेशः अरुणाचलः ।

पर्यटनाधिकारी– शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम् । अतः अरुणाचलः । अस्मिन् प्रदेशे पञ्चाधिकाः नद्यः प्रवहन्ति । विपुला च अत्र वनसंपदा । वनौषधीनां तु अयं स्रोतः एव । पुष्पाणां समृद्धिः सुगन्धिः च मनोहरा । सर्वत्र हरीतिमा । शुद्धपर्यावरेण युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि ।

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 3 = 1 ½**

*i.* के अरुणाचलप्रदेशस्य ज्ञातुम् उत्सुकाः आसन् ?

*ii.* अरुणाचलस्य भूमिः कैः सुशोभिता ?

*iii.* पर्यटनाधिकारी केन माध्यमेन छात्राणां जिज्ञासां शमयति ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 2 = 2**

*i.* अरुणाचलः इति नाम कथम् आगतम् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 3 = 1 ½**

*i.* 'वनसंपदा' इति पदस्य विशेषणं किम् ?

*ii.* 'अभिनन्दनं भवताम्_ _ _ _' इत्यादिवाक्ये 'भवताम्' इति सर्वनाम केभ्यः प्रयुक्तम् ?

*iii.* 'अधुना' इत्यर्थे किम् अव्ययम् अत्र प्रयुक्तम् ?

**14. अधोलिखित–पद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखत ।**

**Rewrite the following explanations of the stanzas after completing them with appropriate words:**

**1 x 6 = 6**

<u>अ.</u> काकः कृष्णः पिकः कृष्णः, को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते, काकः काकः पिकः पिकः ॥

<u>भावार्थः</u> –यदा 1.______ आगच्छति तदा पिकस्य मधुरेण स्वरेण ज्ञायते यद् मध्ये कः 2.__________अस्ति अन्यथा द्वयोः एव वर्णः 3.________ भवति ।

<u>आ.</u> आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥

<u>भावार्थः</u> – शिष्यः शिक्षायाः चतुर्थांशं 1. _______ प्राप्नोति । द्वितीयं चतुर्थांशं स्वस्य बुद्धेः सामर्थ्येण लभते । तृतीयं 2. ______ समये, अन्तिमं भागं 3. _______ च प्राप्नोति ।

**15.अधोलिखितपद्यद्वयस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत ।**

**Complete and rewrite the prose-order-renderings of the following two verses:** **½ x 6 = 3**

**अ.** कपीनां मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

**अन्वयः** – अश्वानां वह्निदाहसमुद्भवः 1. ________ कपीनां मेदसा यथा 2. ________ तमः (तथा) 3. __________ अभ्येति ।

**आ.** अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ॥

**अन्वयः** – यत्र ब्रह्मशिरः 1. __________ परमास्त्रेण वध्यते, 2. _________ द्वादशसमाः तद् राष्ट्रं न 3. __________ ।

**16. रेखाङ्कित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

**Frame questions on the basis of the underlined words:** **1 x4 = 4**

1. संवत्सरे **षड्** ऋतवः भवन्ति ।
2. **मनसः** निग्रहः वायोः इव दुष्करः ।
3. राज्ञः नेत्रदाननिश्चयं ज्ञात्वा **अमात्याः** विषण्णाः अभवन् ।
4. कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि ।

**17. घटनाक्रमानुसारम् अधोलिखित–वाक्यानि पुनः लिखत ।**

**Rewrite the following sentences in the sequential order:** **½ x 8 = 4**

1. युष्माभिः एव मे शोभा अतः यूयं सर्वे मम प्रियाः ।
2. ते सर्वे आत्मनः महत्त्वं प्रतिपादयन्तः अन्योन्यं निन्दन्ति ।
3. एकदा प्रभाते राजहंसः राजहंसी च सरस्तीरे भ्रमतः ।
4. निन्दां श्रुत्वा काकः तत्रागत्य आत्मानं प्रशंसति ।
5. अतः कलहं विहाय परस्परं मोदध्वं जीवनं च रसमयं कुरुध्वम् ।
6. अन्ते प्रकृतिमाता तत्रागत्य कथयति ।
7. तौ काकस्य धवनिं श्रुत्वा तस्य निन्दां कुरुतः ।
8. तदा बकः मयूरः च क्रमेन तत्र आगच्छन्ति ।

**18. प्रसङ्गानुसारं शुद्धम् अर्थं मेलयित्वा लिखत ।**

**Match the following.** **½ x 6 = 3**

| | |
|---|---|
| 1. हेयम् | क. बहुमूल्यम् |
| 2. अवधीरणा | ख. मार्गे |
| 3. अनवध्यम् | ग. त्याज्यम् |
| 4. दक्षः | घ. अपमानः |
| 5. अनर्घम् | ङ. अनिन्दनीयम् |
| 6. पथि | च. कुशलः |